11

एकादशः पाठः

# महाकविः कालिदासः



## पूर्वरूप (स्वर) संधि

महाकवेः कालिदासस्य नाम न केवलं भारते एव प्रसिद्धम् अपितु सर्वस्मिन् विश्वे विख्यातम्। अस्मिन् काव्यसंसारे काव्यपीयूषवर्षकाः येऽपि कवयः सन्ति तेषु कालिदासः सर्वोत्कृष्टोऽस्ति। अयं हि 'कविकुलगुरुः', 'कविश्रेष्ठः', 'महाकविः' इति नाम्ना सुप्रसिद्धः। आङ्गलजनाः तं भारतस्य 'शेक्सपीयरः' इति कथयन्ति।

अयं महाकविः महाराजस्य विक्रमादित्यस्य सभापण्डितः आसीत्। अनेन महाकविना रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, ऋतुसंहारम्, अभिज्ञानशाकुन्तलम् इत्यादीनि काव्यानि नाटकानि च विरचितानि।

एषः महान् कविः कदा कुत्र चाभवत् इति स्पष्टं वक्तुं न शक्यते। अस्य महाकवेः विषये एका जनश्रुतिः श्रूयते यत् कालिदासः प्रारम्भे मूर्खः आसीत्। छलेन च तस्य विवाहः एकया विदुष्या राजकन्यया सह अभवत्। तस्याः नाम विद्योत्तमा आसीत्। तदानीं पत्नीकृतावमानतया पीडितः कालिदासो विद्याम् अधिगन्तुं नितरां प्रायतत शीघ्रमेव च विद्यानिष्णातो महापण्डितोऽभवत्।

कालिदासः संस्कृतभाषायाः भारतस्य कवीनाञ्च गौरवमस्ति। अस्य वैशिष्ट्यं, व्यक्तित्वं, कवित्वं च नाटकेषु गीतकाव्येषु, महाकाव्येषु च प्रस्फुटितम्। तेन विरचितेषु नाटकेषु अभिज्ञानशाकुन्तलं तस्य सर्वोत्तमं नाटकम् अस्ति।

एकः नक्षत्रेषु चन्द्र इव, हंसेषु राजहंस इव **कालिदासोऽपि** जनानां हृदयेषु विराजते। तस्य प्रशंसायां सत्यं कथ्यते–

**"कालिदासो गिरां सारं कालिदासः सरस्वती।"**

## शब्दार्थाः (WORD MEANINGS)

| | | |
|---|---|---|
| पीयूषम् | अमृत | Nectar |
| वर्षकाः | बरसाने वाले | Throwers |
| जनश्रुतिः | किंवदन्ती | Saying |
| अवमानतया | अपमान से | Due to humiliation |
| प्रस्फुटितम् | प्रकट हुआ | Appeared |

## क्रिया (VERB)

| | | | |
|---|---|---|---|
| कथयन्ति | (कथ्) | कहते हैं | Say |
| विरचितानि | (वि + रच्) | रचना की | Wrote |
| शक्यते | (शक्) | सकता है | Can |

## याद रखिए

**पूर्वरूप संधि** – किसी पद के अन्त में ए, ओ के बाद ह्रस्व अ आने पर पूर्वरूप ऽ हो जाता है। जैसे–

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ए | + अ | = | एऽ | हरे | + | अत्र | = | हरेऽत्र |
| ओ | + अ | = | ओऽ | को | + | अपि | = | कोऽपि |

# अभ्यास (Exercises)

## मौखिक (Oral)



**उपसर्ग को अलग कीजिए (Separate the prefix) –**

विख्यातम्, प्रसिद्धम्, विरचितानि, प्रारम्भे, अधिगन्तुम्।

## लिखित (Written)



**1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए (Answer the following questions in Sanskrit) –**

(क) आङ्गलजनाः कालिदासस्य विषये किं कथयन्ति ?

(ख) अयं महापुरुषः कस्य महाराजस्य सभापण्डितः आसीत् ?

(ग) कालिदासस्य विवाहः कया सह अभवत् ?

(घ) कालिदासः कदा विद्यानिष्णातो महापण्डितोऽभवत् ?

(ङ) सः कानि–कानि काव्यानि नाटकानि च अरचयत् ?

**2. संधि कीजिए (Join the words) –**

| विच्छेद | | | | संधि |
|---|---|---|---|---|
| (क) ये | + | अपि | = | ______ |
| (ख) च | + | अभवत् | = | ______ |
| (ग) विद्या | + | उत्तमा | = | ______ |
| (घ) सर्वोत्कृष्टो | + | अस्ति | = | ______ |
| (ङ) सर्व | + | उत्तमम् | = | ______ |

**3. 'कवि' शब्द के रूप सभी विभक्तियों में लिखिए (Write declensions of 'Kavi' in all cases) –**

'कवि'

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | ______ | ______ | ______ |
| द्वितीया | ______ | ______ | ______ |
| तृतीया | ______ | ______ | ______ |
| चतुर्थी | ______ | ______ | ______ |
| पंचमी | ______ | ______ | ______ |
| षष्ठी | ______ | ______ | ______ |
| सप्तमी | ______ | ______ | ______ |
| संबोधन | ______ | ______ | ______ |

**4. कथनानुसार (✓) या (×) का चिह्न लगाइए (Mark (✓) or (×) ) –**

(क) कालिदासस्य जन्मविषये कोऽपि स्पष्टं वक्तुं न शक्यते। ☐

(ख) अयं महापुरुषः प्रारम्भे पण्डितः आसीत्। ☐

(ग) तस्य विवाहः राजकन्यया सह अभवत्। ☐

(घ) कालिदासः विद्याम् अधिगन्तुं कदापि न प्रायतत। ☐

(ङ) 'अभिज्ञानशाकुन्तलम्' कालिदासस्य सर्वोत्तमं नाटकं न अस्ति। ☐

5. **निम्नलिखित शब्दों की विभक्ति व वचन लिखिए (Write the case and number of the following words) –**

| शब्द | विभक्ति | वचन |
|---|---|---|
| (क) सर्वस्मिन् | ________ | ________ |
| (ख) विदुष्या | ________ | ________ |
| (ग) कवयः | ________ | ________ |
| (घ) तस्याः | ________ | ________ |
| (ङ) हृदयेषु | ________ | ________ |
| (च) नाटकम् | ________ | ________ |
| (छ) जनानाम् | ________ | ________ |

6. **संस्कृत में अनुवाद कीजिए (Translate into Sanskrit) –**

(क) महाकवि कालिदास संस्कृतभाषा के सर्वश्रेष्ठ कवि माने जाते हैं।

________________________________

(ख) उनका विवाह विद्योत्तमा के साथ हुआ था।

________________________________

(ग) पत्नी द्वारा अपमानित होने पर उन्होंने विद्या ग्रहण करने का प्रयत्न किया।

________________________________

(घ) कालिदास ने अनेक ग्रन्थों की रचना की।

________________________________

(ङ) अंग्रेज उन्हें भारत का 'शेक्सपीयर' कहते हैं।

________________________________